दैवज्ञश्रीसूर्यकविविरचितं

रामकृष्णविलोमकाव्यम् ।

स्वकृतटीकया समेतम् ।

श्रीमन्मङ्गलमूर्तिमार्तिशमनं नत्वा विदित्वा ततः
शब्दब्रह्ममनोरमं सुगणकज्ञानाधिराजात्मजः ।
यद्ग्रन्थाध्ययनैर्विनेयनिवहोऽप्याचार्यचर्यामगा-
स्सोऽहं सूर्यकविर्विलोमरचनं काव्यं करोम्यद्भुतम् ॥

छन्दःपूरणमुत्क्रमक्रमविधौ साकाङ्क्षता तत्पदे-
ष्वारम्भाचरिते क्रमोऽपि सुतरामेतत्त्रयं दुर्गमम् ।
एवं सत्यपि मन्मतिः कियदपि प्रागल्भ्यमालम्बते
तत्सर्वं गुणिनः क्षमन्तु यदहो यूयं श्रमज्ञाः स्वयम् ॥

कदाचिदपि संतरेत्कृतिपरो नरो नीरधिं कथंचिदपि धावति प्रचरधाम धाराध्वनिः ।
ऋतेऽप्यतिविशारदा प्रचुरशारदानुग्रहं विलोमकविताकृतौ सुकविधीरपारा भवेत् ॥

भागीरथी रामकथातिरम्या कालिन्दिका कृष्णकथा मनोज्ञा ।
सरस्वती सूर्यकवेस्तृतीया ज्ञातुं प्रयागेऽत्र मतिः कवीनाम् ॥

समाक्षराद्यर्विषमाक्षरार्धा द्वेधा भवेद्व्यस्तकवित्वसीमा ।
समानभिन्नार्थतया द्विधाद्या भिन्नाक्षरार्था च भवेद्द्वितीया ॥

अथ कवित्वपरिभाषा पिङ्गलादौ कथिता—

'अध्याहारो यत्तदोर्वा क्रियायाः पादाद्यन्ते वा विसर्गो विसर्गः ।
कुत्राप्यूह्या लक्षणाव्यञ्जना वा विवादेतां चित्रकाव्यानुपूर्वाम् ॥'

नैकाक्षरानि छन्दोक्तिर्नाप्रसिद्धाभिधानकम् ।
नैव व्याकरणक्लिष्टं द्राक्षापाकोऽत्र केवलम् ॥

अथ ययोः कथाप्रसङ्गस्तावेवेष्टदेवतात्वेन प्रणमति—

तं भूसुतामुक्तिमुदारहासं वन्दे यतो भव्यभवं दयाश्रीः।
श्रीयादवं भव्यभतोयदेवं संहारदामुक्तिमुतासुभूतम्॥ १॥

तं भूसुतामुक्तिं वन्दे। भूसुताया रावणरक्षितायाः सीताया मुक्तिर्मोक्षणं यस्मात्तं राघवं वन्दे। नमस्करोमीत्यर्थः। किंभूतम्। उदारहासम्। उदारो गम्भीरो हासो यस्यासौ तथा। उद्वेगनिमित्तेषु सर्वानर्थेषु प्राप्तेष्वप्यनुद्विग्नमित्यर्थः। पुनः किंभूतम्। भव्यभवम्। भव्यः पवित्रो भवोऽवतारो यस्यासौ तथा। अथ कथम्। यतो दयाश्रीश्च बभूवेत्यध्याहारः। दया भूतदया श्रीश्च शोभा च तयोर्निदानमित्यर्थः। एतद्रामपक्षे॥ कृष्णपक्षे तु—श्रीयादवं वन्दे। किंभूतम्। भव्यभतोयदेवम्। भव्या उत्तमा भा दीप्तिर्यस्यासौ सूर्यः। तथा तोयशब्देन चन्द्रः। जलात्मकत्वात्। तयोर्द्योतनाद्देवः। सूर्याचन्द्रमसोरपि प्रकाशक इत्यर्थः। तदुक्तम्—'यदादित्यगतं तेजो जगद्भासयतेऽखिलम्। यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम्॥' अथ किंभूतं यादवम्। संहारदामुक्तिम्। संहारोऽनर्थस्तं ददातीति तथाविधा पूतना तस्या मुक्तिर्मोक्षो यस्मात्स तथा तम्। पुनः किंभूतम्। उत प्रत्युत असुभूतम्। सर्वत्र प्राणरूपेणावस्थितमित्यर्थः। अथवा प्राणनं जीवनं तद्रूपं चैतन्यस्वरूपम्। तदुक्तम्—'अहमात्मा गुडाकेश सर्वभूताशयस्थितः' इत्यादि। पूतनायै मुक्तिं दातुमन्तर्यामित्वेन स्वयमेव प्रेरकोऽभूदित्युक्तम्॥

ननु देहवतोऽपि रामादेः कथमन्तर्यामित्वमित्याशङ्क्य तुल्याक्षरयेन्द्रवज्रयाह—

चिरं विरंचिर्न चिरं विरंचिः साकारता सत्यसतारका सा।
साकारता सत्यसतारका सा चिरं विरंचिर्न चिरं विरंचिः॥ २॥

विरंचिर्ब्रह्मा द्विपरार्धावसानं यावत्सर्वभूतापेक्षया चिरं तिष्ठतीति प्रथमम्। अपरं तु आब्रह्मभुवनाल्लोकाः पुनरावर्तिन इति श्रवणान्न चिरं विरंचिरिति ज्ञायते। तस्यायुषः परिमितत्वात्। अथ साकारता सत्यसतारकास्ति। सेति तच्छब्देन रामस्य या साकारता सत्यसतारका। तारकेण सहवर्तमाना सतारका। सत्या सती सतारका सत्यसतारका। सत्यमबाधितं विज्ञानमयं तारकं यद्ब्रह्म तद्रूपेत्यर्थः। रामपक्षे एतत्॥ कृष्णपक्षे तु—साकारतासत्यसतारकास्ति। या कृष्णरूपिणी साकारता सा सती सर्वदैव वर्तमाना। नित्येत्यर्थः। किंभूता। असतारका। तारकाभिः सहवर्तमानं सतारकं व्योम, तन्न विद्यते यस्याः सा असतारका। व्योमापि यस्यां लीयते इतः परं नित्यत्वं किं वर्णनीयमित्यर्थः। चिरं विरंचिरित्यादि पूर्ववत्॥

अथ रामकृष्णाभ्यां यां मायामवष्टभ्य साकारता स्वीकृता तस्याः स्वरूपं समाक्षरया रथोद्धतयाह—

तामसीत्यसति सत्यसीमता माययाक्षमसमक्षयायमा।
माययाक्षमसमक्षयायमा तामसीत्यसति सत्यसीमता॥ ३॥

असति सत्यसीमता तामसीति । असति शुक्तिकारजतवदसत्ये प्रपञ्चे सत्यसीमता सत्यत्वमर्यादा तामसी मायेति । अथास्या असत्यत्वं कार्यवशादनुभूयत इत्याह—मायेति । यया मायया कृत्वा मा लक्ष्मीः अयमा न विद्यते यमो नियमो यस्याः सा तथा । योग्येऽयोग्ये वा कुत्र स्थातव्यं कियत्कालं स्थातव्यमिति क्षणभङ्गुराया लक्ष्म्या यमो नियमो नास्ति । उत्तरक्षणे पाददर्शनाद्भ्रमरूपतेत्यर्थः । कथंभूतया यया । अक्षमसमक्षया । न क्षमं अक्षमं समक्षं यस्याः सा तथा । तस्या मायायाः स्वरूपे विचार्यमाणे समक्षत्वं न प्राप्नोति प्रेक्षणेनैव नश्यतीत्युक्तत्वात् । यतः परमात्माज्ञानरूपो मायात्वज्ञानरूपा सा कथं ब्रह्मसमक्षतां याति । यतो ज्ञानमज्ञानस्यैव घातकमित्यर्थः । एवमुभयत्रापि सममिति समाक्षरपदद्वयम् ॥

एवमविद्यायाः स्वरूपं निरूप्येदानीं विद्यारूपं विषमाक्षरया शालिन्याह—

का तापघ्नी तारकाद्या विपापा त्रेधा विद्या नोष्णकृत्यं निवासे ।
सेवा नित्यं कृष्णनोद्या विधात्रे पापाविद्याकारताघ्नी पताका ॥ ४ ॥

अत्र त्रिविधसंसारतापघ्नी कास्तीति विचार्यमाणे त्रेधा विद्यास्तीति । त्रिःप्रकारा त्रेधा ऋग्यजुःसामात्मिका । ननु तर्हि न कर्मकाण्डं विद्याशब्दव्यपदेश्यम् । विद्यां चाविद्यां च 'यस्तद्वेदोभयं सह' इत्याद्युक्तत्वादित्याशङ्क्याह । किंभूता त्रेधा विद्या । तारकाद्या । तारकं परं ब्रह्म श्रीरामाख्यमाद्यं श्रेष्ठत्वान्निरूपणीयत्वेन प्राप्तं यस्याः सा तथा । उपनिषद्विद्यात्मिकेत्यर्थः । पुनः किंभूता । विपापा विगतं पापमज्ञानं यया सा तथा । अथ तस्याः पापोपशामकत्वे दृष्टान्तमाह—निवासे नोष्णकृत्यमिति । नितरां वासो यस्मिन्निति निवासः शीतलच्छायाद्युपस्कृतं गृहं तस्मिन्नुष्णकृत्यं संतापभवनं नास्ति । तद्वद्वेदार्थपरिशीलनेन त्रिविधतापोन्मूलनमित्यर्थः । रामपक्षे चैतज्ज्ञेयम् ॥ कृष्णपक्षे तु—कृष्णभक्तिसहकृतैव विद्या अज्ञाननाशकर्त्रीत्याह—सेवा नित्यमिति । विधात्रेऽनुष्ठात्रेऽर्जुनाय ब्रह्मणे वा कृष्णनोद्या नित्यं सेवा पापाविद्याकारताघ्नी भवति । कृष्णेन नोद्या प्रेर्यमाणा नित्यं सेवा अनन्यभक्तिः सा पापं दुःखं तन्मूलमविद्याकारोऽज्ञानं तदुभयमपि नाशयति । तदुक्तं भगवद्गीतायाम्—'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥' इति । अनन्यभक्तिरेव कृष्णसाक्षात्कारे निमित्तमिति सदृष्टान्तमाह—किंभूता सेवा । पताका । पताकेव पताका । यथा गरुडलाञ्छनाङ्किता कृष्णध्वजपताका दृष्टमात्रैव आगतः कृष्ण इति साक्षात्कारं व्यनक्ति तद्वदनन्यभक्तिरपीत्यर्थः ॥

अथ प्रथमं मायापरमात्मनः समक्षं स्थातुं न शक्नोतीति स्वरूपानुसंधानेन मायायास्तिरस्कार इत्युक्तम् । तत्रात्मज्ञाने महानायासः । श्रीरामसेवया तु विद्याप्राप्तिस्तया तत्कालमेवाज्ञाननिरास इति विषमाक्षरयेन्द्रवज्रयाह—

श्रीरामतो मध्यमतोदि येन धीरोऽनिशं वश्यवतीवराद्वा ।
द्वारावतीवश्यवशं निरोधी नयेदितो मध्यमतोऽमरा श्रीः ॥ ५ ॥

वा इत्यथवा स पुमान्धीरः वेनानिशं श्रीरामतः मध्यमतोदि श्रीरामतो निमित्तभूतान्मध्यं मध्येऽवभासमानं प्रपञ्चाख्यमतोदि नाशितम्। स एव धीर इत्यर्थः। किंभूताच्छ्रीरामतः। वश्यवतीवरात्। वशं नेतुं समर्थं वश्यं रूपं तद्वती जानकी तस्या वरात्। भर्तुरित्यर्थः॥ कृष्णपक्षे तु—निरोधी पुमान्मध्यं नु चिदचिद्ग्रन्थिस्वरूपं मनः इतः प्रपञ्चाद्द्वारावतीवश्यवशं नयेत्। वायुनिरोधीन्द्रियनिरोधी च पुमान्द्वारावत्या वश्यस्तत्रासक्तः कृष्णस्तत्र वशं नयेत्। योगेन वैराग्येण वा चित्तं निरुध्य श्रीकृष्ण एव एवं वशं नयेदित्यर्थः। तत्र किं भवतीत्याह—अतोऽस्मादुपायाच्छ्रीर्मोक्षलक्ष्मीरमरास्थिरा भवति। अन्यथा निरोधवानपि विघ्नैरभिभूयत इत्यर्थः। उक्तं च—'तथा न ते माधव तावकाः कचिद्भ्रश्यन्ति मार्गात्' इत्यादि॥

अथ कथाप्रारम्भः—तत्र विश्वामित्रः स्वयज्ञसंरक्षणार्थं रामं याचितुं दशरथं प्रत्यगादिति विषमाक्षरया रथोद्धतयाह—

कौशिके त्रितपसि क्षरव्रती योऽददाद्द्वितनयस्वमातुरम्।
रन्तुमास्वयन तद्विदादयोऽतीव्ररक्षसि पतत्रिकेशिकौ॥ ६॥

यः क्षरव्रती द्वितनयस्वं कौशिकेऽददात्। क्षरेषु सर्वेषु भूतेषु व्रतमभीप्सितपूरणं येन तथाविधो दशरथो द्वयोस्तनययोः समाहारो द्वितनयं तदेव स्वं धनं कौशिके विश्वामित्रे दत्तवान्। ननु प्राणादपि प्रियतमं पुत्राख्यं धनं विश्वामित्रार्थं केन निर्बन्धेन दत्तवानित्याशङ्क्याह—किंभूते विश्वामित्रे। त्रितपसि त्रिःप्रकारकं त्रिगुणात्मकं प्रसादक्षोभसमर्थं तपो यस्य स तथा। तस्मिन्किंभूतं द्वितनयस्वम्। आतुरम्। पित्रोर्वियोगादित्यर्थः॥ कृष्णपक्षे तु—श्रीशुकः परीक्षितं प्रति वक्ष्यमाणं कृष्णकथोद्देशमनुवदति—भो आस्वयन, आ समन्तात्सुष्ठु अयनं गतिः परमार्थगतिर्यस्य तथाविधः परीक्षित्। तद्विरकृष्णोऽतीव्ररक्षसि न विद्यते तीव्रं रक्षः यस्मात्तदतीव्ररक्षस्तस्मिन्पूतनाख्ये। तथा पतत्रिकेशिकौ पतत्री पक्षी वकासुरः, केशी हयरूपी दैत्यः, तयोः कुः पार्थिवशरीरं तस्मिन्नादयोऽस्ति। आसमन्ताद्दया कृपा यस्य स तथा। पूतनावककेशिशरीराणि कृपयैवातारयदित्यर्थः। किं कर्तुम्। रन्तुं क्रीडां कर्तुम्। क्रीडाछलेनेत्यर्थः॥

अथ विश्वामित्रेण सह रामं प्रस्थितमाकर्ण्य राक्षसास्ताटकां प्रेषयामासुरित्याह—

लम्बाधरोरु त्रयलम्बनासे त्वं याहि याहि क्षरमागताज्ञा।
ज्ञातागमा रक्ष हि या हि या त्वं सेना बलं यत्र रुरोध बालम्॥ ७॥

भो लम्बाधरोरु, त्वं क्षरं याहि। अधरश्च ऊरू च अधरोरु। लम्बमधरोरु यस्याः सा लम्बाधरोरुः तस्याः संबोधनम्। तथा किंभूते। त्रयलम्बनासे। त्रये लोकत्रये लम्बी नासा यस्याः सा तथाविधे। त्वं क्षरं नाशयोग्यं मानुषदेहं रामं याहि याहि। आदरे वीप्सितद्विरुक्तिः। किंभूता त्वम्। आगताज्ञा। आगता प्राप्ता आज्ञा रावणाज्ञा यया तथा॥ कृष्णपक्षे—श्रीकृष्णं गोकुलस्थितमाकर्ण्य कंसः पूतनामाज्ञापयति—हे पूतने, त्वं तत्र याहि। बलं पुरुषार्थं रक्ष।

तत्र केत्याह—यत्र सेना बालं रुरोध । इनेन स्वामिना नन्देन सहवर्तमाना यशोदा बालं कृष्णं रुरोध रुद्ध्वा आच्छाद्य स्थितवती तत्रेत्यर्थः । कुत एतावन्तं विश्वासं कृतवतीत्याह—हीति निश्चयेन । ज्ञातागमा ज्ञात आगमो यया सा । कोऽपि बालघातार्थं आयास्यतीति संभावयन्तीत्यर्थः ॥

अथ ताडकया सह शूर्पणखापि समागतेत्याह—

लङ्कायना नित्यगमा धवाशा सार्कं तयानुन्नयमानुकारा ।
राकानुमा यन्ननु यातकंसा शावाधमागत्य निनाय कालम् ॥ ८ ॥

लङ्कायना तया सार्कं नित्यगमाभूत् । लङ्कायामयनं गतिर्यस्याः सा शूर्पणखा तया ताडकया सार्कं नित्यगमाभूत् । नित्यं गच्छतीति नित्यगमा । पर्यटनासक्ताभूदित्यर्थः । अनुन्नयमानुकारा । न नुन्नः प्रेरितोऽनुन्नः स्वतः प्रवृत्त एवंविधो यो यमः कृतान्तस्तद्वदनुकारो यस्याः सा । निष्कृपेत्यर्थः । किंभूता । धवाशा धवविषयिणी आशा यस्याः सा तथा । रामं भर्तारमपेक्ष्यमाणा ॥ कृष्णपक्षे—शावाधमा आगत्य कालं निनाय । शवप्रियाः शावाः क्रव्यादास्तेष्वधमा बालघातिनी पूतना आगत्य गोकुलं प्राप्य कालं षण्मासकं कृष्णं निनाय प्राप्तवती । ननु राक्षसी गोकुलान्तर्गता तत्रत्यैः किं पूर्वं न निषिद्धेत्याह—यथतो राकानुमा । राका पूर्णिमा तया अनुमीयते सा । प्रथमं राकावदतिसुन्दरं रूपं धृतवती तद्दाक्षिण्येन केनापि गृहान्तर्गमनेनाक्षिप्ता । नन्विति निर्धारेण । यातकंसा । यातोऽन्तरितः कंसो यस्याः सा तथा । पुनः कंसेन न दृष्टा । कृष्णग्रस्ता सती विपन्ना इत्यर्थः ॥

अथ विश्वामित्रस्य यागव्यवस्थामनुष्टुभाह—

गाधिजाध्वरवैरा ये तेऽतीता रक्षसा मताः ।
तामसाक्षरतातीते ये रावैरध्वजाधिगाः ॥ ९ ॥

गाधिजो विश्वामित्रस्तस्याध्वरो यागस्तत्र वैरं येषां ते खरदूषणादयस्ते अतीता रामेण ते हताः । देहादिप्रपञ्चमतिक्रम्य गता इत्यर्थः । किंभूताः । रक्षसा रावणेन मताः स्वसंमानेन प्रसिद्धाः ॥ कृष्णपक्षे—पूतनावधमाकर्ण्य कंसेनान्ये शकटतृणावर्तादयः प्रेषिताः इत्याह—तामसाक्षरतातीते कृष्णे सति ये रावैः प्रेषिता दैत्या ते अध्वजाधिगा आसन् । तामसाहंकारेणासमन्तादुत्पन्नायाक्षरता प्रपञ्चात्मकता ततोऽप्यतीते परब्रह्मरूपे कृष्णे सति दैत्या रावैः कंसनिदेशशब्दैरागतास्तेऽध्वजाधिगा गोकुलमार्गयाने जाता या आधिर्मानसी व्यथा तां गच्छन्तः प्राप्ताः । अहो गोकुलं गत्वा प्रपञ्चातीते कृष्णेऽस्माभिः किं कर्तव्यम् । पूतनावन्मर्तव्यमिति पर्याकुलचित्ता आसन्नित्यर्थः ॥

अथ मुनिभिः केवलं रामार्पणबुद्ध्या कृतस्य यागस्य प्रशंसामाह—

तावदेव दया देवे यागे यावदवासना ।
नासवादवया गेया वेदे यादवदेवता ॥ १० ॥

ऽवे रघुनाथे दया कृपा प्रीतिस्तावदेव संभवतीति। यावद्यागेऽवासना यागे क्रियमाणेऽवासना स्वर्गादिभोगप्राप्तये इच्छाराहित्यम्। तस्मात्फलराहित्येन यो यागः स रामप्रीतये भवतीत्यर्थः॥ कृष्णपक्षे—कृष्णे परब्रह्मस्वरूपतामवधारयन्तो दैत्याः पुनः परामर्शं चक्रुरित्याह—यादवदेवता कृष्णमूर्तिर्वेदे उपनिषद्भागे या गातुं निरूपयितुं योग्या न तु साक्षात्कारं कर्तुमथवान्येन निरूपयितुं न शक्यते इत्याह—नासवादिति। असुसंबन्धि आसवं प्राणात्मकं शरीरम्। अवेत्युपसर्गोऽवलक्षणत्वद्योतकः। तथा चावलक्षणान्मनुष्यदेहात्सकाशान्नहि निरूपयितुं शक्यते। एवं प्रथमं तस्य निरूपणासंभवे तस्य हननमस्माभिरसंभावितमेवेत्यर्थः। वस्तुतस्तु आसवात्। आसवादिति मदजननवस्तुमात्रोपलक्षणम्। तस्मान्न अवया न ज्ञेया। तन्निमित्तमासवादुर्ज्ञेयेत्यर्थः। अवयेति अवयायते इत्यवया। 'आतोऽनुपसर्गे कः' इति कः। पश्चाट्टाप्। अवपूर्वको यातिरेतिश्च ज्ञानार्थः॥

अथ स्वयंवरदर्शनार्थं कौशिकेन सह जनकगृहं प्रति गतो रामस्तत्र किं कृतवानित्याह—

> सभास्वये भग्नमनेन चापं कीनाशतानद्धरुषा शिलाशैः।
> शैलाशिषारुद्धनताशनाकी पञ्चानने भग्नभये स्वभासः॥ ११॥

अये श्रोतः, अनेन रामेण सभासु शिलाशैः सह चापं भग्नम्। सभासु स्थितासु शिलावद्दृढा जानकीविषयिण्याशा येषां ते शिलाशाः राजानस्तैः सह चापं भग्नम्। न केवलं चापं भग्नम्। राजानो भग्ना भग्नमनोरथाः कृता इत्यर्थः। कीनाशतानद्धरुषा कीनाशस्य भावः कीनाशता यमरूपता तया आनद्धोऽभिनिविष्टो रावणस्तस्य रुषा कोपेन। प्राचीनवैरानुबन्धिनिमित्तेन पूर्वं धनुरुद्धर्तुं प्रवृत्तो रावणो धनुषाधः पतितः, परंतु न हत इति रुषा कोपेनेवेत्यर्थः॥ कृष्णपक्षे—गोवर्धनोद्धरण इन्द्रो लाघवं प्राप्त इत्याह—पञ्चानने नृसिंहे कृष्णे स्वभासः स्वप्रतापान्मग्नभये निःशङ्कं यागं कारयितुं प्रवृत्ते सति शैलाशिषारुद्धनताशनाकी दृष्टः शैलस्य गोवर्धनस्याशिषा अभीष्टपूरणेन रुद्धा रोधं प्रापिता अतएव नता भग्ना हविर्ग्रहणेच्छा यस्य तथाविधो नाकी स्वर्गाधिपोऽभूदित्यर्थः। 'यो गोवर्धनभूधरं करधृतं लीलाम्बुजन्मायितं कृत्वा सप्तदिनानि नाचलदपाद्गोपांश्च घोरापदः। यश्चक्रे निजशासने हरिविरिञ्च्याखण्डलादीन्सुरानुद्दण्डानपि सोऽवताज्जगदिदं गोपालराजो हरिः॥' इति श्रीभागवते दशमस्कन्धे॥

अथ स्वयंवरार्थमागतानां राज्ञां वर्णयन्नाह—

> न वेद यामक्षरभामसीतां का तारका विष्णुजितेऽविवादे।
> देवाविते जिष्णुविकारता का तां सीमभारक्षमयादवेन॥ १२॥

यामक्षरभामसीतां लोको न वेद। अक्षरमविच्युतं भाम सौभाग्यं यस्याः सा अक्षरभाम्नी सा चासौ सीता च तां न जानातीत्यर्थः। अविवादे विष्णुजिते का तारका विष्णुना रामचन्द्रेण जितं विष्णुजितं तस्मिन्विष्णुजिते अविवादे सर्वसंमते सति का तारका ता-

रकात्वं का प्राप्नोतीत्यर्थः । तारकासंबन्धस्तु चन्द्रं विनान्येन सह न भवति । प्रकृते रामचन्द्रेण सह सीतैव तारकात्वं प्राप्तुमर्हति । नान्येनेत्यर्थः ॥ कृष्णपक्षे—गोकुलोपरि क्षुब्धस्येन्द्रस्य न किंचिच्चलतीत्याह—सीम्नो भारः सीमभारः सीमा गिरिमर्यादा तस्या भारक्षमश्चासौ यादवश्च तेन देवशक्त्या अविते रक्षिते गोकुले जिष्णोरिन्द्रस्य शिलावर्षणादिनिकारता का । न कापीत्यर्थः ॥

अथ धनुषि भग्ने सति जानक्या रामो वृत इत्याह—

तीव्रगोरन्वयत्रार्यो वैदेहीमनसो मतः ।

तमसो न महीदेवैर्योऽत्रायन्वरगोव्रती ॥ १३ ॥

तीव्रा गावः किरणा यस्यैवंविधस्य तीव्रगोः सूर्यस्यान्वयं वंशं त्रायन्ते तेऽन्वयत्राः सूर्यवंशाभिमानरक्षका दिलीपादयस्तेष्वार्यः श्रेष्ठः सूर्यवंशालंकरणं रामः वैदेहीमनसो मतः जानक्या मनःपूर्वकं वृतः । धनुःपणबन्धेनेत्यर्थः ॥ कृष्णपक्षे—ब्रह्मसत्रं प्रति गतः कृष्णस्तैर्न मानित इत्याह—अत्रायन्वरगोव्रती कृष्णः अत्र ब्रह्मसत्रे आयन्प्राप्तः वरा भाग्यशालिन्यो गाव एव व्रतं परिपालितत्वेनोपस्थितं यस्यासौ गोव्रती कृष्णः तमसोऽज्ञानान्महीदेवैर्ब्राह्मणैर्न मानित इत्यध्याहारः ॥

अथ जानक्याः पारमार्थिकं स्वरूपं वर्णयन्नाह—

वेद या पद्मसदनं साधारावततार मा ।

मारता तव राधा सा नन्द सद्मप यादवे ॥ १४ ॥

साधारा मा अवततार । आधारेण विष्णुना सह लक्ष्मीः अवतारं चक्रे । सा का । या पद्मसदनं वेद पद्ममेव सदनं अधिवासस्थलं वेद ज्ञातवती । अनेन लक्ष्म्याः पूर्णावतार इति सूचितम् । अथ वा पद्मं विष्णोश्चरणकमलं तदेव सदनं विश्रामस्थलं जानातीति ॥ कृष्णपक्षे—अथ कापि गोपिका नन्दं प्रति राधायाः पैशुन्यं वदति—भो सद्मप गृहाधीश नन्द, सा तव राधा । सेति तच्छब्देन विदितवृत्तान्तेति सूचितम् । तथा यादवे सैवं कृष्णे मारता मदनरूपता इत्येवं समाचारोऽस्ति । अनेन कृष्णस्य वयःसंबन्धिनी वर्णिता भवति ॥

अथेश्वरस्य धनुर्भङ्गमाकर्ण्य परशुरामोऽभ्यगादित्याह—

शैवतो हननेऽरोधी यो देवेषु नृपोत्सवः ।

वत्सपो नृपु वेदे यो धीरोऽनेन हतोऽवशैः ॥ १५ ॥

नृपोत्सवः शैवतो हनने अरोधी । नृपस्य आगतस्य दशरथस्योत्सवो यस्मात्स नृपोत्सवो रामः शिवस्य पक्षपातीति शैवः परशुरामस्तस्माच्छैवतः हनने कोपाविर्भावेऽप्यरोधी न रोधं प्राप्तवान् । अकुण्ठितशक्तिरासीदित्यर्थः । विमानस्थितेषु देवेषु पश्यत्सु सत्सु ॥ कृष्णपक्षे—अथ कृष्णस्वरूपं धेनुकवधं चाह—यः वेदेऽस्ति वेदे प्रतिपादितोऽस्ति स नृपु वत्सपोऽभूत् । अनेन वत्सपेन कृष्णेन धीरो धेनुकः अवशैः असाध्यैस्तज्जातीयैरन्यैः सह हतः । मारित इत्यर्थः ॥

अथ परशुरामो रामं प्रति सक्रोधं वदति—

नगोपगोऽसि क्षर मे पिनाकेऽनायोऽजने धर्मधनेन दानम् ।

नन्दानने धर्मधने जयो ना केनापि मे रक्षसि गोपगो नः ॥ १६ ॥

भो क्षर नश्वर, मे पिनाके त्वं नगोपगः असि । यद्यपि त्वया जीर्णं धनुर्भग्नं तथापि मद्दानते धनुषि नगस्य पर्वतस्योप समीपे गच्छतीति नगोपगः पाषाणस्तत्तुल्योऽसि। मदीयधनुषोऽतिगुरुत्वेन निश्चेष्टो भवसीत्यर्थः । एवमेतादृशे त्वयि जनकेन यत्कन्यादानं कृतं तदयुक्तमित्याह—धर्मधनेन कन्यालक्षणेन अजने यद्दानं सः अनायः । अजनोऽदानपात्रम् । एवं अदानपात्रे त्वयि यद्दानं कृतं सः अनायः नयो नीतिस्तत्संबन्धी नायः, न नायः अनायः । अनीतिरित्यर्थः ॥ कृष्णपक्षे—दैत्यवधं दृष्ट्वा नन्दः कृष्णं स्तौति—भोः कृष्ण, त्वं नन्दानने नासि । नन्द एव आननं मुख्यो यस्मिन्गोकुले तस्मिन् ना पुरुषः परमात्मा असि। बलवत्त्वात् । अतएव किंलक्षणे नन्दानने। धर्मधने जन्मान्तरीयधर्मैरर्जितं तस्मिंस्तथा नः अस्माकं जयोऽपि त्वमेवासि । केनापि सुकृतविपाकेन गोपगः गोपविशेषेण वर्तमानः सन् मे इति मां रक्षसि ॥

अथ रामं राज्याधिकारिणं दृष्ट्वा कैकेयी सापत्नभावं दर्शयतीत्याह—

ततान दाम प्रमदा पदाय नेमे रुचामस्वनसुन्दराक्षी ।

क्षीरादसुं न स्वमचारु मेने यदाप दाम प्रमदा नतातः ॥ १७ ॥

आमस्वना अपरिपक्ववचना तथाविधा सुन्दराक्षी कैकेयी पदाय राज्यप्राप्तये यद्दाम निर्बन्धकारणं ततान विस्तारयामास। स्वपुत्राय राज्यं देयमिति दशरथाय निर्बन्धं चकारेत्यर्थः । आमस्वनेति पदेन नेदं मातृकृत्यमिति सूचितम् । अथ कथं दाम ततानेत्याह—इमे रुचा न रुचा दीप्त्या इमे रामादयः पदयोग्या न भवन्ति । तथा तस्याः किं लौकिकं भयं नास्तीत्याह—प्रमदेति । प्रकृष्टो गर्वो यस्याः सा तथा ॥ कृष्णपक्षे—अथ कदाचित्कृष्णेन दधिभाण्डे भग्ने दुग्धनाशे जाते यशोदायाः अतिश्रमोऽभूदित्याह—प्रमदा यशोदा क्षीरासकाशादसुं प्राणमपि स्वकीयं न मेने । यथा क्षीरे ममता तथा प्राणे मा भूदित्यर्थः । अथ कृष्णबन्धनार्थं यद्दाम आप प्राप तदचारु कार्यक्षमं न भवतीति मेने। अतः दामपूरणहेतोर्नता नम्रा । परिश्रान्ताभूदित्यर्थः ॥

अथ वनवासार्थं रामे प्रस्थिते सति अहल्योद्धारणप्रसङ्गमाह—

तामितो मत्तसूत्रामा शापादेष विगानताम् ।

तां नगाविपदेऽपाशा मात्रासूत्तमतो मिता ॥ १८ ॥

मत्तसूत्रामा तां इतः प्राप्तः मत्तः काममोहितः सूत्रामा इन्द्रस्तां प्रति प्रसिद्धामहल्यां प्रति गतः । 'सुत्रामा गोत्रभिद्वज्री' इत्यमरः। तथा एष सूत्रामा इन्द्रः शापाद्विगानतां इतः गौतमकृतात् विगानतां सहस्रभगत्वादिलक्षणां प्राप्तः ॥ कृष्णपक्षे—पूर्वश्लोके यशोदया कृष्णः दाम्ना बद्ध इति निरूपितं तत्र यमलार्जुनोन्मूलनप्रसङ्गमाह—तां व्यवस्थामनुभूय

नगाविपदे कृष्णे सति यशोदा मात्रासु अपाशा तथा उत्तमतो मिता अभूत् । न गच्छतस्तौ नगौ स्थावरौ वृक्षौ यमलार्जुनौ ताभ्यां अविपममूर्तं मोक्षः तत्प्रदे कृष्णे सति यशोदा-मात्रासु दधिदुग्धादिविषयेषु अपाशा अनिर्बन्धा सती उत्तमतः अलौकिककर्म कर्तुः कृ-ष्णान्मिता समर्यादाभूत् ॥

अथ शूर्पणखायाः प्राप्तायाः नासिकानिकृन्तनं कृतमिति शालिनीछन्दसाह—

नासावद्यापत्रपाज्ञाविनोदी धीरोऽनुत्या सस्मितोऽद्याविगीत्या ।

त्यागी विद्यातोऽस्मि सत्यानुरोधी दीनोऽविद्या पात्रपद्यावसाना ॥ १९ ॥

शूर्पणखा तावन्नासावद्यापत्रपास्ति । नासा नासिका तस्या अवद्यं विगानं छेदलक्षणं तत्र अपत्रपा निर्लज्जास्ति । लक्ष्मणस्तु आज्ञाविनोदी आज्ञया रामाज्ञया विनोदो यस्या-तिविनोदी । तथा धीरः उदात्तः श्रीरामस्तु अनुत्या शूर्पणखाकृतया स्तुत्या उपालम्भेन अद्याविगीत्या अकीर्तिख्यापनेन सस्मितोऽभूत् ॥ कृष्णपक्षे—नारदशापादुन्मोचि-ताभ्यां कुबेरपुत्राभ्यां स्तुतः कृष्णस्तौ प्रति स्वरूपमाह—अहं विद्यातः ज्ञानतस्त्यागी ज्ञानप्रदोऽस्मि । तथा सत्यानुरोधी सत्यं परब्रह्म तत्र अनुरोधोऽत्यासक्तिर्यस्य स तथा । लोकस्तु दीनः विषयसुखासक्तोऽस्ति । अविद्या अविद्या तु पात्रपद्यावसाना पात्रं ज्ञान-पात्रं मद्भक्तस्तस्य पद्या पद्धतिर्ज्ञानमार्गनिष्ठत्वं तेनैवावसानं नाशो यस्याः सा तथोक्ता । एवं सति शापनिर्मुक्तिः क्रियत इत्यर्थः ॥

अथ पञ्चवटीवने सपरिग्रहे रामे कृताधिवासे सति किंचिदपूर्वं जातमित्याह—

संभावितं भिक्षुरगादगारं याताधिराप स्वनघाजवंशः ।

शर्वं जघान स्वपराधिताया रङ्गादगारक्षुभितं विभासम् ॥ २० ॥

भिक्षुः संभावितमगारमगात् । भिक्षुरूपधरो रावणः संभावितं पूर्वं निर्भयकत्वेन ज्ञातं अगारं पञ्चवटीस्थलं अगात् । ततः स्वनघाजवंशः याताधिः सन् आप । सुतरां अनघः निष्पापः एवंविधोऽजवंशो ब्रह्मवंशो रावणः यातो गतः आधिश्चिन्ता यस्य जानकीं दृष्ट्वा निश्चितः जानकीं प्राप । निष्पापवंशोत्पन्नोऽप्येतादृशं निन्द्यं पापकर्माकरोदित्याश्चर्यादिति सू-चितम् ॥ कृष्णपक्षे—पूर्वोपक्रान्तः कृष्णो रङ्गाद्रङ्गस्थानात्सकाशात् शर्वं चिन्तयापूर्वमेव गतप्राणं कंसं जघान । किंभूतम् । अगारक्षुभितम् । अगारं राजकीयपरिवारस्तस्मिन्क्षु-भितं सक्रोधम् । एष चाणूरघाती कृष्णो बहिः कथं न निःसार्यत इति । पुनः किंभूतम् । विभासं विच्छायं गतकान्तिम् । सद्योऽमृतचिह्नयुतमित्यर्थः । अथ कस्माद्धेतोर्जघानेत्याह— स्वपराधितायाः । अपराधिनो भावः अपराधिता सुतरामपराधिता तस्यास्तया । पितृ-निर्बन्धाग्रजहननपूतनादिकूटरचनादयो येऽपराधास्तत्कर्तृत्वादित्यर्थः ॥

अथ मृगयापरावृत्तस्य रामस्य जानकीमपश्यतो निर्वेदमाह—

तयातितारस्वनयागतं मा लोकापवादद्भितयं पिनाके ।

केनापि यं तद्विदवाप काले मातंगयानस्वरतातियातः ॥ २१ ॥

तया मागतं तया जानक्या मेति धिक् मृषैव गतं निष्क्रान्तम्। अथ सा स्वतो न गता बलात्कारेण नीता भविष्यतीत्याह—किंभूतया। अतितारस्वनया। उच्चैराक्रोशमानयापि। एवं तस्यां गतायां पिनाके लोकापवादद्वितयं जातम्। पिनाके पुरुषार्थाधिष्ठाने लोकापवादद्वितयं अज्ञानेन मृगपृष्ठतो धावनं स्त्रीहानिश्चेति अपवादद्वितयम् जातमित्यर्थः॥ कृष्णपक्षे—कंसहननात्पूर्वरङ्गमाह—यं कंसं केनापि प्रकारेण कालः कृतान्तोपमः कृष्णः अवाप। ननु परब्रह्मस्वरूपस्य कृष्णस्य कंसद्वेषः कथमित्याह—किंभूतः कालः। तद्वित् तदुपस्थितं कंसनिबन्धनं वेत्तीति तद्वित्। अथ स कः प्रकारस्तमाह—किंभूतः कालः।मातंगयानस्वरतातियातः। मातंगः कुवलयापीडस्तस्य यानं धावनं स्वरश्च तथाक्रोशस्तमतिलङ्घ्य यातः। कुवलयापीडं क्रोशन्तं मारयित्वा रङ्गं प्राप्त इत्यर्थः॥

अथ रामस्य पुनर्जानकीं प्रति निर्वेदोक्तिमाह—

शवेऽविदा चित्रकुरङ्गमाला पञ्चवटीनर्म न रोचते वा।

वातेऽचरो नर्मनटीव चापं लामागरं कुत्रचिदाविवेश॥ २२॥

भो जानकि, अविदा अज्ञानेन मया सह पञ्चवटीनर्म न रोचते वा। येन त्वं गतासीत्यर्थः। अथ तदेवाज्ञानं प्रकटयन्नाह—शवे शवीप्रियराक्षसे चित्रकुरङ्गमालास्तीति मायामृगमजानता। मयेत्यर्थः॥ कृष्णपक्षे—कृष्णस्य सामर्थ्यं कंसहननात्पूर्वमेव प्रकटीभूतमित्याह—यः कृष्णः वाते वात्याभूतदैत्ये तृणावर्ते अचरः अचलोऽभूत्तथा लामागरं कुत्रचिदाविवेश। लामा पूतना तस्याः गरं विषं नर्मैव क्रीडामात्रमिव कुत्रचिदाविवेश। न कृष्णे अनेन वाल्ये एतावन्तं पुरुषार्थं कृतवान्कि पुनर्यौवने इति सूचितम्। एवमेतदुभयं सदृष्टान्तमाह—किमिव। नर्मनटी चापमिव नटी नर्तकीचापं भ्रूभङ्गमात्रं दर्शयति। तद्वदित्यर्थः॥

अथ जानकीं स्कन्धे गृहीत्वा सत्वरं निर्गतस्य रावणस्य जटायुना साकं सङ्गोऽभूदिति रथोद्धतयाह—

नेह वा क्षिपसि पक्षिकंधरा मालिनी स्वमतमत्त दूयते।

ते यदूत्तमतम स्वनीलिमाराधकं क्षिपसि पक्षिवाहने॥ २३॥

जटायुः रावणं प्रति वदति—भो स्वमतमत्त, इयं मालिनी दूयते। स्वमतं स्वाग्रहस्तेन मत्त उन्मत्तः स्वाग्रहमेव करोषि परकीयविचारं न शृणोषि। असावधानत्वादित्यर्थः। मालिनी अतिसुकुमारा जानकी दूयते क्लेशं प्राप्नोति। किंभूता पक्षिकंधरा। पक्षिणि स्वपक्षपातिनि मयि कंधरा मन्या यस्याः सा तां इह मत्स्थाने न क्षिपसि वा न मुञ्चसि वा। तर्हि सङ्ग्रामेण मोचयिष्यामीति तात्पर्यार्थः॥ कृष्णपक्षे—कंसवधे कृते उद्धवाक्रूरादयः कृष्णं स्तुवन्ति—भो यदूत्तमतम, स्वनीलिमाराधकं स्वस्य नीलिमा तं आराधयतीति स्वनीलिमाराधकं पुरुषं ते पक्षिवाहने क्षिपसि। यदुषु उत्तमतम श्रेष्ठतम त्वदनुस्मृतिं कुर्वाणं पुरुषं ते पक्षिवाहने गरुडः तस्मिन् क्षिपसि आरोहयसि।

गरुडारूढं कृत्वा वैकुण्ठं प्रति नयसीत्यर्थः । एवमपरोक्षभावनया एतत्फलं कंसस्य श्रीमत्साक्षात्कारे प्रवृत्तस्य मुक्तिरित्यत्र किं चित्रमित्यर्थः ॥

ततो जटायुवचनाज्जानकीशुद्धिं लब्ध्वापि दक्षिणतश्चलितस्य रामस्यावस्थामाह—

वनान्तयानस्वणुवेदनासु योषामृतेऽरण्यगताविरोधी ।
धीरोऽविताऽगण्यरते मृषा यो सुनादवेणुस्वनयातनां वः ॥ २४ ॥

स रामः योषामृते वनान्तयानस्वणुवेदनासु अरण्यगताविरोधी अभूत् । योषां जानकीं विना वनान्तेषु यानं परिभ्रमणं तत्र महाक्लेशप्राप्तावपि सुतरामणुवेदनासु । विवेकेन लक्ष्मणकृतेन सान्त्वनेन च ईषत्क्लेशेषु जातेषु सत्सु अरण्यगताः वानराः आविरोधिनो मित्राणि वयस्याः यस्य स्त्रीवेदनासूद्भवासु सतीषु वानरैः सह सख्यं यज्जातं तेन विश्रान्तिरभूदित्यर्थः ॥ कृष्णपक्षे—कृष्णे विहाय गोकुलं मथुरां गते सति विरहखिन्ना गोप्यो मिथः प्रोचुरित्याह—अगण्यरते धीरः वः अविता इति । मृषा गणयितुं संभावयितुं योग्यं गण्यं न गण्यं अगण्यं अश्लाघ्यं कुब्जया सह रतं तत्र धीरः निर्लज्जत्वेन प्रवृत्तः कृष्णः वः अविता पुनर्गोकुलमागत्य रक्षिष्यतीति मृषा असत्यं तत्कुतः सुनादवेणुस्वनयातनां किं न स्मरतीत्यध्याहारः । सुष्ठु नादो यस्यासौ सुनादः एतादृशः वेणुस्तस्य स्वनस्तेन कृतां यातनां दूराद्वेणुस्वनमाकर्ण्य यावत्कृष्णदर्शनं तावत्पर्यन्तं या यातनाविरहदुःखमस्माकं किं पुनस्तस्मिन् परदेशं गते सतीति किं न स्मरतीत्यर्थः ॥

अथ पूर्वश्लोके अणुवेदनास्विति पदेन महति दुःखे सति कथं विश्रान्तिरित्याह—

किं नु तोयरसा पम्पा न सेवा नियतेन वै ।
वैनतेयनिवासेन पापं सारयतो नु किम् ॥ २५ ॥

पम्पा तोये रसः स्वादुता यस्याः सा तोयरसा एवंविधा पम्पा किं नास्ति । अस्त्येवेत्यर्थः । तथा—वै इति निश्चयेन । नित्यनियतेनता हनुमता सेवा किं नास्ति । अस्त्येव । एवमुभयथापि रामस्य विश्रान्तिर्विरहदुःखेऽप्यासीदित्यर्थः ॥ कृष्णपक्षे—गोप्यः उद्धवं परिहसन्ति—वैनतेयनिवासेन गरुडनिवासेन कृत्वा पापं सारयतो दूरीकुर्वतः पुरुषस्य किं नु वाच्यमित्यध्याहारः । कृष्णोपासनया निष्पापस्त्वं कथमस्मान्प्रतारयसीति सूचितम् ॥

अथ वालिना हृतदारः सुग्रीवो रामं शरणं प्रयात इत्याह—

स न तातपहा तेने स्वं शेनाविहितागसम् ।
संगताहिविनाशे स्वं नेतेहाप ततान सः ॥ २६ ॥

स न तातपहा रामः शेन स्वं तेने न तस्य नम्रस्य शरणं गतस्य आतपं संतापं हन्तीति तथाविधो रामः शेन सुखेन स्वं तेने । आश्वासजनितसुखेन स्वं स्वकीयं सुग्रीवं तेने विस्तारितवान् । न विहितं न संपादितम् आगः अपराधो येन तथा । निरपराधत्वेनाविहितागसमिति सूचितमित्यर्थः ॥ कृष्णपक्षे—उद्धवः गोपिकां प्रति कृष्णस्याश्रितपक्षपातं वदति—स नेता नियन्ता कृष्णः इह सरस्वतीरसं स्थानं नन्दं संकटके आप प्राप

तथा संगताहिविनाशे स्वं जनं ततान । संगतः प्राप्तः यो अहिः सर्पस्तस्य विनाशे कृते सति स्वकीयं जनं गोकुलस्थितं ततान विस्तारयामास । नन्दं निधनशङ्कया मुमूर्षुं विस्तारितवान् स किं भवतीत्युपेक्षत इति सूचितम् ॥

अथ वालिनं हत्वा सुग्रीवपत्नीं मुमोचेत्याह—

कपितालविभागेन योषादोऽनुनयेन सः ।
स नये न नु दोषायो नगे भाविलतापिकः ॥ २७ ॥

स रामः अनुनयेन प्रीत्या कपितालविभागेन योषादोऽभूत् । कपिर्वाली तालाश्च तद्रक्षकास्तेषां विभागेन विच्छेदेन योषां ददातीति योषादः योषां सुग्रीवपत्नीं दत्तवान् ॥ कृष्णपक्षे—गोपिका वदन्ति—स कृष्णः नये नीतिमार्गे नास्ति । नु इति वितर्के । किंतु दोषायोऽस्ति । दोषाणां दुःखानां आयः प्राप्तिर्यस्मात्स तथा । पुनरायास्यतीति चेन्न । कुतः । यथा नगे भाविलतापिकः नगे पर्वते भाविनी या लता वल्ली सहकारशाखा तत्र पिकः पिकतुल्यः । यथा यमसंभावितार्थः तद्वदित्यर्थः ॥

अथ वालीपुत्रः अङ्गदो रामं प्रति वदति—

ते सभा प्रकपिवर्णमालिका नाल्पकप्रसरमभ्रकल्पिता ।
तात्पिकभ्रमरसप्रकल्पना कालिमार्णव पिक प्रभासते ॥ २८ ॥

भो राम, ते सभा प्रकपिवर्णमालिकास्ति । प्रकृष्टा ये कपयो वानरास्तेषां ये विचित्रवर्णास्तेषां माला यस्यां सा तथा नानाविधवानरश्रेणीसंपन्ना । सा तु अल्पकप्रसरं यथा भवति तथा अल्पसंख्याका परंतु अभ्रकल्पिता नास्ति । अभ्रे आकाशे मेघमण्डलपर्यन्तं वा नास्ति । अनेन रक्षःपङ्क्तिः आकाशे प्रकल्पितास्तीत्यर्थः ॥ कृष्णपक्षे—गोपिकास्तावदन्योपदेशेन पिकं प्रति वदन्ति—भोः कालिमार्णव मालिन्यसमुद्र पिक कोकिल, त्वयि तात्पिकभ्रमरसप्रकल्पना प्रभासते । तल्पे भवं तात्पिकं सुरतं तस्य भ्रमरस्तत्र यो रसः स प्रभासते स्वप्ने सुरतभ्रमे यावान् रसः स एव त्वयि भासते । न साक्षादस्मत्सुरतसुखं तत्तु तव स्वप्नेऽपि दुर्लभमित्यर्थः ॥

अथ रावणो यद्यपि सकलसैन्यसन्नाहवानस्ति तथापि तत्र वीरलक्षणं नास्तीत्याह—

रावणेऽक्षिपतनत्रपानते नाल्पकभ्रमणमक्रमातुरम् ।
रन्तुमाक्रमणमभ्रकल्पना तेन पात्रनतपक्षिणे वरा ॥ २९ ॥

रावणे अक्रमातुरं यथा भवति तथा अक्षिपतनत्रपानते सति अल्पकभ्रमणं न भविष्यति न क्रमः अक्रमः परस्त्रीहरणादिकस्तेन आतुरं यथा स्यात्तथा अक्षिपतनं रामस्य दृष्टिपातस्तेन या त्रपा लज्जा तया रावणे नम्रे सति पर्याकुलतया यत् भ्रमणं चित्तभ्रमः किं न भविष्यति । भूयादेव । अहो वीरव्रतमतिक्रम्य पापं कृतवतो मम जयो नास्त्येवेति लज्जया कृत्वा चित्तस्यैव किं त्रासो न भविष्यतीत्यर्थः ॥ कृष्णपक्षे—उद्धवो गोपिकाः प्रति वदति—भो गोप्यः, तेन आक्रमणं दैत्यनिबर्हणादिकं तथा अभ्रवत्कल्पना मेघ-

श्यामता च रन्तुं क्रीडार्थमवलम्बिता तत्स्थानेऽनेन तस्य न किमपि प्रयोजनं तत्र तेन कारणेन सा मेघश्यामता पात्रनतपक्षिणे वरा पात्रे नताः पात्रनताः पुरुषास्तेषां पक्षो यस्य स तत्पक्षी तस्मै कृष्णाय वरा कल्पिता। भक्तानां ध्यानगोचरत्वायेत्यर्थः । तथा च भवतीनां ध्यानयोगेनैव कृतार्थत्वमस्तीति सूचितम् ॥

अथ सीताशुद्ध्यर्थमादिष्टो हनुमान् रामं प्रति विद्युन्मालयाह—

दैवे योगे सेवादानं शङ्का नाये लङ्कायाने ।
नेयाकालं येनाकाशं नन्दावासे गेयो वेदैः ॥ ३० ॥

अये श्रीराम, लङ्कायाने लङ्कां प्रति गमने शङ्का नास्ति। कुतः। यतो दैवे योगे सेवादानं जातमस्ति। देवसंबन्धी दैवस्तस्मिन् तव योगे या सेवावलम्बितास्ति। अतो लङ्कागमने त्वत्सेवाया एव सामर्थ्यमित्यर्थः ॥ कृष्णपक्षे—पुनरुद्धवः कृष्णं स्तौति—स कृष्णः नन्दावासे नन्दव्रजेऽभूत्। स कः। येन आकाशं नेयाकालं नेतुं संहर्तुं योग्यो नेयः आसमन्तात् कलयति तत् एवंविधमाकाशं काले आकाशादिकमपि संहर्तुं क्षमः। तत्रभवतीनां सारः श्रमः कियानित्यर्थः। किंभूतः। वेदैः गेयः गातुं योग्यः ॥

अथ जानकीशुद्धिं कृत्वा परावृत्तो हनुमान् रामं प्रति वदतीति समाक्षरया शालिन्याह—

शङ्कावज्ञानुत्त्वनुज्ञावकाशं याने नद्यामुग्रमुद्याननेया ।
याने नद्यामुग्रमुद्याननेया शङ्कावज्ञानुत्त्वनुज्ञावकाशम् ॥ ३१ ॥

हे राम, सा जानकी उग्रमतिक्लेशं यथा भवति तथा नद्यां कुल्यायां उद्याने नेया उद्याने क्रीडावने नेतुं योग्या नेया अस्ति। तथा सीता कृत्रिमसरिदुपकण्ठे उद्यानेऽस्तीत्युक्तम्। इत्थं त्वं रावणस्य क्रीडावनं गन्तुं कथमवकाशं लब्धवानित्याह—याने प्रयाणकाले अनुज्ञावकाशं यथा भवति तथा शङ्कावज्ञानुत् तु श्रीमदनुज्ञालब्धावकाशत्वेन शङ्कावज्ञे नुदिते। तथा शङ्का राक्षसभयं तत्कृतावज्ञा जम्बूवनपालादिकृता। तदुभयं मया निराकृतमित्यर्थः ॥ कृष्णपक्षे—गोकुलात्परावृत्त उद्धवः कृष्णं प्रति वदति—भोः कृष्ण, उद्याननेया कापि गोपिका नद्यां याने उग्रं अतिक्लेशं यथा भवति तथा तिष्ठति। या त्वया पूर्वं स्कन्धोपरि धृत्वा उद्यानं प्रति प्रापिता तर्हि तस्या दयितदेवरादयः किं न सन्तीत्याह—हे कृष्ण, सा गोपिका अहं पुनरागमिष्यामीति श्रीमदनुज्ञया लब्धावकाशं यथा स्यात्तथा शङ्कावज्ञा सती तिष्ठति । शङ्काया दयितभयं तस्य अवज्ञा अवगणना यस्याः सा दयितदेवरादीनां शङ्काभयं तथा तत्कृतविकारायविगणय्य प्राणावशेषा तिष्ठति। एवं तयैकया विनान्याः सर्वा अपि मया संबोधिता इत्युक्तं भवति ॥

अथ समुद्रं नियम्य लङ्कां गन्तुं शक्तोऽपि रामः क्षुद्रवानरकौतुकं द्रष्टुं सेतुबन्धार्थमादिदेशेत्याह—

वा दिदेश द्विसीतायं यं पाथोयनसेतवे ।
वेतसेन यथोपायं यन्तासीद्विशदे दिवा ॥ ३२ ॥

वेति अथवा स रामः यं कंचिद्वानरं पाथोयनसेतवे दिदेश । पायसामुदकानामयनं यस्मिन् पाथोयनः समुद्रस्तस्य सेतवे सेतुबन्धायादिदेश आज्ञापयामास ।. किमर्थं परम् । द्विसीतायं यथा स्यात्तथा । द्वयोः सीतयोः समाहारो द्विसीतं तस्यायः प्राप्तिः । किं पुनरेकसीतालब्धिः । अपरं सेतुबन्धाख्यं पुरुषार्थं सीताद्वयलाभो भविष्यतीत्युत्साहेनादिदेशेत्यर्थः ॥ कृष्णपक्षे—कंसे हते मातामहायोग्रसेनाय राज्यं दत्त्वा स्वयं तत्सैन्यपतिर्बभूवेत्याह—स कृष्णः यथोपायं वेतसेन यन्तासीत् । यथोपायं राजनीतिमनतिक्रम्य वेतसेन वेत्रधारत्वेन नियन्तासीत् विशदे दिवा सुमुहूर्तोपलक्षिते दिवा दिवसे ॥

अथ राक्षसैः सह संग्रामोपस्थितः श्रीरामो हनुमत्प्रशंसामाह—

वायुजोऽनुमतो नेमे संग्रामेऽरवितोऽह्नि वः ।
वह्नितो विरमे ग्रासं मेनेऽतोऽमनुजो युवा ॥ ३३ ॥

हे वानराः, वः इति युष्माकं मध्ये अरवितः अह्नि वा संग्रामे उपस्थिते सति वायुजोऽनुमतः अस्ति । न रविर्यस्मिंस्तत् अरवि तस्मिन् । रात्रावित्यर्थः । वा अह्नि दिवा वा संग्रामे, उपस्थिते सति हनुमानेव अनुमतः संमतः ।· रात्रौ दिवा वा मायाविभिः सह संग्रामे वायुपुत्र एव निर्वाहयिष्यतीत्युक्तं भवति । इमे सर्वे वानराः नानुमताः न संमताः ॥ कृष्णपक्षे—कंसादिहनने राज्यस्थापने वा कृष्णस्य किं चित्रं वर्णनीयमित्याह—अतः परं यः विरमे प्राप्ते सति वह्नितः वह्निमेव ग्रासं भक्षत्वेनोपस्थितं मेने । अमनुजः देवः सन् युवा पराक्रमी । तत्र न किमपि चित्रमित्यर्थः ॥

अथ रामरावणयोर्युद्धप्रसङ्गे वानरैर्व्याकुलितो रावणो रामेण सह न प्रभावमगादित्याह—

क्षताय मा यत्र रघोरितायुरङ्कानुगानन्यवयोऽयनानि ।
निनाय यो वन्यनगानुकारं युतारिघोरत्रयमायताक्षः ॥ ३४ ॥

यत्र अङ्कानुगानन्यवयोऽयनानि सन्ति तत्र इतायुः रघोः क्षताय माभूत् । अङ्कं अनुगच्छन्ति ते अङ्कानुगाः शरणं गता वानरास्तेष्वनन्यं वयः जन्म येषां ते अनन्यवयसः सुग्रीवहनुमदादयस्तेषां अयनानि संग्रामे व्यूहप्रवेशपरिसरणानि यत्र तत्र इतायुर्दशास्यः रघोः रामचन्द्रस्य क्षताय शस्त्रादिभिर्घाताय मानसमर्थोऽभूत् । प्रथमतो वानरैरेव व्याकुलीकृतः रामेण सह योद्धुमलब्धावकाशोऽभूदित्यर्थः ॥ कृष्णपक्षे—वृन्दावने कृष्णो दैत्यानवधीदित्युक्तम् । तत्र त्रयमतिभयानकं हतमित्याह—यः आयताक्षः कृष्णः युतारिघोरत्रयं मुक्तिं निनाय । युताः योगं प्राप्ताश्च ते अरयश्च तेषु घोरत्रयं निनाय प्रापितवान् । पूतना अघासुरः केशी चेति भयानकं त्रयं स्वान्तिके प्रापितमित्यर्थः । अथ भयानकमेव व्यनक्ति—किंभूतं घोरत्रयम् । वन्यनगानुकारं वने स्थितः वन्यः स चासौ नगः पर्वतस्तद्वदनुकारो यस्य सः । तथा अतिप्रचण्डमित्यर्थः ॥

अथ सपरिवारस्य रावणस्य तारके परब्रह्मणि प्रवेशोऽभूदित्याह—

तारके रिपुराप श्रीरुचा दाससुतान्वितः ।
तन्वितासु सदाचारु श्रीपरा पुरि के रता ॥ ३५ ॥

रिपुः श्रीरुचा तारके आप रिपुः रावणः श्रीर्मोक्षलक्ष्मीः तस्याः रुग्दीप्तिः प्रकाशस्ते-नेत्यर्थः । किंभूतः । दाससुतान्वितः । दासाश्च कुम्भकर्णादयः सुता इन्द्रजिदादयस्ते सर्वेऽपि तारकं प्राप्ता इत्यर्थः ॥ कृष्णपक्षे—सदा चारु यथा स्यात्तथा तन्वितासु गोपीषु श्री-परा पुरि के रता आसीत् । तनुना शरीरेण इतासु प्राप्तासु गोपिकासु मध्ये श्रियः लक्ष्म्याः परा श्रीपरा द्वितीयलक्ष्मीरिव सैरन्ध्रीपुरि मथुरायां के परब्रह्मणि कृष्णे रता-सीत् । गोकुले कृष्णविरहेण तदा ध्याननीतासु सतीषु मथुरायां कृष्णस्य सैरन्ध्र्या साकं गार्हस्थ्यमभूदित्यर्थः ॥

अथ रावणे सपरिवारे हते सति लङ्का हतप्रभाभूदिति विद्युन्मालयाह—

लङ्का रङ्कागाराध्यासं याने मेया काराव्यासे ।
सेव्या राका यामे नेया संध्यारागाकारं कालम् ॥ ३६ ॥

याने रामागमने सति लङ्का रङ्कागाराध्यासं यथा स्यात्तथा मेयाभूत् । लङ्का नगरी रङ्कस्यागारं रङ्कागारं तस्य अध्यासो भ्रमस्तेन ज्ञातुं योग्याभूत् । इयं लङ्का तु कस्य-चिद्रङ्कस्य अगारमिति भ्रमेण ज्ञाताभूदित्यर्थः । कस्मिन्सति । काराव्यासे सति कारा बन्दीगेहं तस्य अव्यासे अविस्तारे सति । कारा विस्तारं निर्भिद्य बन्दीभूतेषु देवेषु । निर्मो-चितेषु सत्स्वित्यर्थः ॥ कृष्णपक्षे—पूर्वं सैरन्ध्र्या साकं कृष्णस्य गार्हस्थ्यमभूत्तत्र दृष्टान्त-माह—सेव्या सेवितुं योग्या सेव्या अतिरमणीयमभूदित्युक्तम् । सैरन्ध्री यामे संयोगावसरे कालं मेघश्यामं कृष्णं प्रति नेया नेतुं योग्या नेयाभूत् । अन्वयोग्यपदेनोभयोः संयोगे शोभाति-शयः सूचितः । काकमिव राका संध्यारागाकारमिव पूर्णचन्द्रोदयोपलक्षिता राका संध्या-रागाकारं प्राप्य यथा शोभातिशयशालिनी भवति तद्वदित्यर्थः ॥

गोदावरीब्रह्मगिरेः सकाशात्संप्रापिता प्रागुदधिं प्रयत्नात् ।
येनार्थिना सोऽपि पुनः प्रतीपमानेतुमद्रिं प्रभवेत्किमेताम् ॥

एवं विलोमाक्षरकाव्यकर्तुर्भूयांसमायासमवेक्ष्य तज्ज्ञाः ।
जानन्त्विमां चित्रकवित्वसीमां दैवज्ञसूर्याभिधसंप्रदिष्टाम् ॥

इति श्रीदैवज्ञपण्डितसूर्यकविविरचितं विलोमाक्षररामकृष्णकाव्यं

समाप्तम् ।